वितव्य" इति च मुद्राराक्षसम् । [आज्ञानुकूले दासादौ

**आज्ञावह** पु० आज्ञां वहति वह—अच् । आदेशवाहके

**आज्ञासम्पादिन्** पु० आज्ञाम् आदिष्टविषयं सम्पादयति सम्+पद+णिच्-णिनि ६त०स० स्त्रियां ङीप् । आदिष्ट विषयसम्पादके अनुकूले दासादौ ।

**आज्य** न०आज्यते आ+अन्ज—क्यप् नलोपः । १घृते ।"सर्पिर्विलीनमाज्यं स्याद्घनीभूतं घृतं भवेदित्युक्ते २विलीने सर्पिषि "स्रुवेण दक्षभागादाज्यं गृहीत्वा"भवदेवः "पूतं पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः" इ पदमन्त्रः ३श्रीवासे चन्द्रने पु०अजयपालः ।"आजिमीयुस्तस्मादाज्यानामाज्यत्वमिति निरुक्ते सामस्तोमभेदे । स च"स्तोमः सामवि०ब्रा०भा०उक्तः "वह्निप्रवमानसूक्तस्य आद्यम् अग्न आयाहिवीतये" इत्यादि सूक्तम्,आनो मित्रावरुण इति द्वितीयम् "आयाहि सुष्म आहृत इति"तृतीयम् । "इन्द्राग्नी आगतमित्यादि चतुर्थम्" उत्तरा०१प्र० ३,५,६,७, सूक्तानि तान्येतानि प्रातः सवने गायत्रसाम्ना गीयमानानि आज्यस्तोत्राख्युच्यन्ते तेषु चाज्यस्तोत्रेषु पञ्चदश स्तोमो भवति तस्य स्तोमस्य विष्टुतिरेवमाम्नायते । "पञ्चभ्योहिंकरोति स तिसृभिः स एकया स एकया पञ्चभ्योहिंकरोति स एकया स तिसृभिः स एकया पञ्चभ्योहिङ्करोति स एकया स एकया स तिसृभिः" सामविधानब्राह्मणम् "एवं त्रिरावर्त्त्यं तत्र प्रथमावृत्तौ प्रथमायास्त्रिरावृत्तिः द्वितीयावृत्तौ मध्यायास्त्रिरभ्यासः । तृतीयावृत्तौ उत्तमायास्त्रिरभ्यासः । सोऽयं पञ्चदशस्तोम इति"

**आज्यदोह** न० सामवेदिपाठ्ये सूक्तभेदे "वामदेव्यं बृहत्साम ज्येष्ठसाम रथन्तरम् । तथा पुरुषसूक्तञ्च रुद्रसूक्तं ततः परम् । आज्यदोहानि सामानि शान्तिकं भारुडानि च । पश्चिमे द्वारपालौ तु पठेतां सामगौ तथा" दानपारि० पु० तानि च सामानि देवव्रतसंज्ञकानि त्रीणि यथा । "अधि पतायि मित्र पतायि क्षत्रप तायि स्वाः प तायि धनप ता२,यि ना २, माः । मन्युना वृत्रहा सूर्य्येण स्वराट्चेन मघवा दक्षिणास्य प्रिया तनूराज्ञा विश्वं दाधार । वृषभस्त्वष्टा वृत्रेण शचीपतिरन्नेन पयः पृथिव्या वृणिकोऽग्निना विश्वं भूतम् । व्यश्वो वायुना विश्वाः । प्रजा अभ्यपवथा वषट्कारेणाद्ध्भाक् सोमेन सोमपाः समिज्या परमेष्ठी । ये देवादेवाः । दिविषदः । स्थलेभ्यो वो देवादेवेभ्यो नमः । ये देवादेवाः । अन्तरिक्षसदः । स्थलेभ्यो० । ये देवा० । पृथिवीषदः । स्थलेभ्यो० । ये देवा० । अप्सुषदः । स्थलेभ्यो० । ये देवा० दिविषदः । स्थलेभ्यो० । ये देवा० । आशासदः । स्थलेभ्यो० । अवज्यामिव धन्वने विते मन्युन्नयामसि स्थूडतां नदूह अस्मभ्यम् । इडा २, ३, भा । यदृदं विश्वं भूतं युयो २, । आउ । वा २,३, ना २,३,४, माः ॥१॥ अधिप तायि मित्रप तायि क्षत्रप तायि । स्वःप तायि धनप ता २, यि । ना २, माः । नम उत्ततिभ्यश्चोत्तन्वानेभ्यश्च नमो नीषङ्गिभ्यश्चोपवीतिभ्यश्च नमोऽस्यद्भ्यश्च प्रतिदधानेभ्यश्च नमः प्रविध्यद्भ्यश्च प्रव्याधिभ्यश्च नमः त्वरद्भ्यश्च त्वारिभ्यश्च नमः श्रीढभ्यश्च श्रायिभ्यश्च नमस्तिष्ठद्भ्यश्चोपतिष्ठद्भ्यश्च नमो यते च वियते च नमः पथे च विपथाय च अवज्यामिव धन्वने इत्यादि प्राग्वत् ॥२॥अधिप । तायि । मित्रप । तायि क्षत्रप । तायि । स्वःप । तायि । धनप । ता २, यि । ना २, माः । नमोऽन्नाय नमोऽन्नपतय एकान्नाय चावपन्नादाय च नमो नमः । रुद्राय तीरसदे नमः स्थिराय स्थिरधन्वने नमः प्रतिपदाय च पटरिणे च नमस्त्रियम्बकाय च कपर्द्दिने च नम आश्रयेभ्यश्च प्रत्याश्रयेभ्यश्च नमः क्राव्येभ्यश्च विरिम्फेभ्यश्च नमः संहते च विहते च अवज्यामित्यादि पूर्ब्बवत्३ । (सामारण्ये ५प्र०१अ० ६,७,८गा०) गानाशक्तौ अधिपतये इत्याद्यनुवाकं त्रिधा जपेत् अधिपतये मित्रपतये क्षत्रपतये स्वःपतये धनपतये नम इत्येव पठनीयमेवमग्रेऽपि अस्मभ्यमित्यनन्तरं य इदं विश्वं भूतं युयोवे नम इति नीषङ्गीत्यत्र निषङ्गीत्येव पठनीयमन्यत् गानांशं स्तोभं विहाय समानम् ।

**आज्यप** पु०आज्यं पिबन्ति आज्य+पा—क उप०स० । पुलस्त्यस्य पुत्रे वैश्यानां पितृदेवेषु । "सोमपा नाम विप्राणां क्षत्रियाणां हविर्भुजः । वैश्यानामाज्यपा नाम शूद्राणान्तु सुकालिनः" मनुः । "पुलस्त्यस्याज्यपाःपुत्राः" इति भा०आ०प० । "देवा आज्यपाँ आवहेति" "देवा आज्यपा अग्निंहोत्रायावहेति" च शत० ब्रा० ।

**आज्यभाग** पु०आज्यस्य भागः । १घृतैकदेशे "सरस्वत्याज्यभागा भवति" शत०ब्रा० । घृतस्य २वैदिकाहुतिभेदे च स च ऋग्वेदिनामग्नेरुत्तरभागे स्रुवेणाग्नये दीयमान आहुतिविशेषः तद्दक्षिणभागे सोमाय दीयमान आहुतिभेदश्च । "तूष्णीमाघार्य्याघारावाज्यभागौ जुहुयादग्नये स्वाहा सोमाय स्वाहेति" आश्व०गृ० । यजुर्वेदिनान्तु अग्नये स्वाहा इदमग्नये इति उत्तरपूर्ब्बार्द्धे सोमाय स्वाहा इदं